# जनभाषा संस्कृतम्

**डॉ. दिनेशकुमारयादव:**
सहायकाचार्य:– शिक्षापीठम्, श्रीलालबहादुरशास्त्रीराष्ट्रिय,संस्कृतविश्वविद्यालय:, नवदेहली

**Article Info**
Volume 4 Issue 6
Page Number: 92-96

**Publication Issue :**
November-December-2021

**Article History**
Accepted : 01 Dec 2021
Published : 25 Dec 2021

**शोधसारांश:-**

**सुरभारतीं कथं नो समधीत भारतीया:।**
**दृग्वारिवारिणी का जननीं विना द्वितीया।।**

"भाष्यते व्यक्त-वाग्रूपेणाभिव्यञ्ज्यते इति भाषा''। भाषा मानवानां कृते अनिवार्यसाधनं मन्यते। भाषाया: अभावे सम्पूर्णे संसारेऽन्धकार: एव स्यात्। भाषा मानवसभ्यताया: संस्कृतेश्च विकासे महत्वपूर्णं योगदानं करोति। भाषाया: मातृभाषारूपं सर्वाधिकं प्रभावशाली भवति। भाषासु एका अन्या भाषा अपि भवति, यस्यां प्राचीनसंस्कृतिभण्डार: सुरक्षित: भवति। क्रमेऽस्मिन् भारतीयभाषासु संस्कृतभाषा विश्वसाहित्यस्य प्राचीनतमा भाषा वर्तते। विभिन्नै: प्रमाणै: संस्कृतभाषितभाषात्वेनासीदिति अवश्यं वक्तुं शक्यते। अस्माभि: सदैव भारतीयसंस्कृते: संरक्षणाय परिवर्धनाय च भाषेयं बाल्यादेव तेषां व्यवहारे उपयोक्तुं शक्या। संस्कृतं जनभाषाकर्तुम् उपहुति:, संस्कृतं पुन: जनभाषाकर्तुं मार्ग:।

**मुख्यशब्दा:-** भाषा, सामाजिकजीवनं, मानवसभ्यता, संस्कृति:, सभ्यता, संस्कृतं, जनभाषा, संस्कृतसमाराधका:, वर्तमानस्थिति:, उपहुति:।

**भाषा-** भाषा मानवानां कृते अनिवार्यसाधनं मन्यते। अस्याभावे मानवजीवनस्य विकास: प्रगतिश्चापूर्णा भवति। मानवस्य समस्तसामाजिकजीवनं भाषाऽऽधारितो वर्तते। भाषाया: अभावे सम्पूर्णे संसारेऽन्धकार: एव स्यात्। काव्यादर्शे उल्लिखितमस्ति –

**इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा।**
**वाचामेव प्रसादेन लोकयात्रा प्रवर्तते।।**
**इदमन्धतम: कृत्स्नं जायेत भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।**

आचार्यदण्डी:, काव्यादर्श:, प्रथमपरिच्छेद:– 3

अत: भाषा समाजसापेक्षवस्तु वर्तते। मानवजीवनेन सह तस्या: घनिष्ठसम्बन्ध: वर्तते। यदि भाषासदृशं ज्योति: संसारे प्रदीप्तं न भवेत् तर्हि परित: अन्धकार: एव स्यात् । भाषाविषये **डॉ. रामबाबूसक्सेनामहोदयनामभिप्राय:** वर्तते–

**"यै: ध्वनिचिह्नै: मानव: परस्परं विचारविनिमयं करोति सैव भाषा कथ्यते।"**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

भाष् व्यक्तायां वाचि इति धातुना –

**"भाष्यते व्यक्त-वाग्रूपेणाभिव्यज्यते इति भाषा।"**

डॉ. कपिलदेवद्विवेदीमहोदयानुसारम्–

**"स्फुटवाक्करणोपात्तो भावाभिव्यक्तिसाधक:।**

**संकेतितो ध्वनिर्वात: सा भाषेत्युच्यते बुधै:।।"**

डॉ. कपिलदेवद्विवेदी, भाषा विज्ञान एवं भाषा शास्त्र,

विश्वविद्यालय प्रकाशन, वाराणसी– 2012

भाषा मानवसभ्यताया: संस्कृतेश्च विकासे महत्वपूर्णं योगदानं करोति। तत्रापि शिक्षायां भाषासम्बद्धसाहित्यस्य विशिष्टमवदानं भवति। उच्यते अपि यदि शिक्षा जीवनस्य निर्मात्री तर्हि भाषा अस्योद्देश्यपूर्तये अत्यन्तं प्रभाविसाधनं वर्तते। भाषा विभिन्नरूपं धारयन्ती अस्माकं सम्मुखे भवति यथा– मातृभाषा, प्रादेशिकभाषा, राष्ट्रभाषा, सांस्कृतिकभाषा अन्ताराष्ट्रीयभाषा चेत्यादय:।

भाषाया: मातृभाषारूपं सर्वाधिकं प्रभावशाली भवति। अस्यामेव व्यक्तित्वस्य मूलप्रकृते: पालनपोषणं च जायते। क्रमेऽस्मिन राष्ट्रभाषाया: अपि विशिष्टं गौरवं भवति।

**संस्कृतस्य वैभवम्-** राष्ट्रभाषातिरिक्ता एका अन्या भाषा अपि भवति। यस्यां प्राचीनसंस्कृतिभण्डार: सुरक्षित:। भारतवर्षे संस्कृतभाषा एव तादृशी भाषाऽस्ति या प्राचीनभाषा प्राचीनसंस्कृत्या ओतप्रोता। विषयेऽस्मिन् दण्डिना काव्यादर्शे निगदितम्–

**"संस्कृतं नाम देवी वागान्वाख्याता महर्षिभि:।"** काव्यादर्श: – 2.33

विश्वस्मिन् सर्वेषु राष्ट्रेषु भारतं सांस्कृतिकरीत्या अतिप्रसिद्धं वर्तते, तत्र संस्कृतमेव मूलम्। प्राचीनकालादारभ्य प्रचाल्यमानेयं भारतीति प्रसिद्धा।

**"उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।**

**वर्षं तद् भारतं नाम भारती यत्र सन्तति:।।"** विष्णुपुराणम्

प्रसिद्भाषाशास्त्रिणा भर्तृहरिणा वाक्यपदीयब्रह्मकाण्डे प्रतिपादितमस्या: भाषाया: महत्त्वम्–

**न सोऽस्ति प्रत्ययो लोके य: शब्दानुगमादृते।**

**अनुविद्धिमिव ज्ञानं सर्वं शब्देन भासते।।**

(भर्तृहरि:,'वाक्यपदीयं,ब्रह्मकाण्डम्,'श्लोकसंख्या–124)

संस्कृतभाषा विश्वसाहित्यस्य प्राचीनतमा भाषा वर्तते। मानवजीवनस्य सर्वे संस्कारा: अस्यां भाषायां सन्निहितास्सन्ति। गर्भवस्थाया आरभ्य मृत्युपर्यन्तं जीवनस्य सर्वेऽपि संस्कारा: अत्र दृष्टिपथमायान्ति। नूनमेषा भाषा संस्काराणां जननी वर्तते। ऐहिकं पारलौकिकं च सर्वमपि ज्ञानमत्र वर्तते।

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**

**आदौ वेदमयी दिव्या यत: सर्वा: प्रवृत्तय:।।**

महाभारत, शांतिपर्व– 232.24

एतेन इयमेव वाक् सर्वासां प्रवृत्तीनां हेतुभूतेति तेषां प्राचां निश्चप्रचं प्रत्यय:। किञ्च इयं हि गीर्वाणवाणी मानवसभ्यताया: संकेत इति मन्यते। सम्प्रत्यपि ऐतिहासिका: मानवसभ्यताया: संस्कृते: पुरातत्त्वानाञ्चान्वेषणार्थं संस्कृतमेव

समवलम्बन्ते। अथ च संस्कृतं बह्वीनां भाषाणां जननी इत्यभिधीयते। अतः संस्कृतात् ऋते न काचित् भारतीयभाषा, न कश्चित् भारतीयः, न वा संस्कृतिः जीवितुमर्हति।

साम्प्रतं भारतदेशे संस्कृतेः वैशिष्ट्यं न्यूनं जायमानमस्ति यतोहि वर्तमानभारतीयशिक्षणपद्धतौ संस्कृतापेक्षया इतरविषयाणां भाषाणां च समावेशो जातः। पूर्वं भारतदेशः "विश्वगुरुः" आसीत् तस्य मूलं संस्कृतस्य जनभाषास्वरूपमासीत्।

**संस्कृतस्य प्राचीनजनभाषास्वरूपम्-** अतीतेत्वेतादृश आसीदस्याः प्रभावो यदस्यां भाषायां निबद्धः कश्चिदपि ग्रन्थः प्रामाणिकतान्नालभत। बोधैः, जैनाचार्यैः लोकायतैश्च लोकभाषामादृत्यापि स्वसिद्धान्तानां लोकप्रामाणिकतायै प्राचाराय च संस्कृतभाषायां ग्रन्थरचना विधायि। अस्यां भाषायां निबद्धास्तु ग्रन्थाः प्रामाणिकतामुद्वहन्तो द्रुतमेव लोकप्रियतां व्यापकतां चाधिगच्छन्ति स्म।

कस्मिन्नपि काले ग्रन्थरचना सहजावगमनाय तत्कालीनजनभाषायामेव भवति। रामायणतोमुनित्रयविरचितेभ्यो व्याकरणग्रन्थेभ्यो यास्काचार्यस्य निरुक्तसाक्ष्यतः संस्कृतस्य लोकभाषात्वं विवादातीतमेवास्ति। निर्दुग्धाः गावो घण्टाभिः विक्रेतुं न शक्यन्ते। सर्वांगपूर्णं व्याकरणं, अप्रतिमशब्दकोशः, वैज्ञानिकलिपिः, विषयव्यापकतायुक्तविपुलसाहित्यं संस्कृतस्य गौरवपूर्णम् इतिहासं प्रतिपादयति।

अयि मान्याः संस्कृतसमाराधकाः, इदानीं तु पाश्चात्यैरपि वेदाः विश्वस्य प्राचीनतमग्रन्थरूपेण अंगीकृताः। ऐतिहासिकं साहित्यं संस्कृतस्य तत्कालीनलोकभाषात्वमुद्घोषकं वर्तते। तेष्वन्यतमाः- वेदाः, पुराणानि, उपनिषद्, रामायणं, महाभारतं, महाकाव्यानि, नाटकानि, योगशास्त्रं, ज्योतिर्विज्ञानं, चरकसंहिता, खगोलशास्त्रम् इत्यादयः सन्ति।

साहित्यालोडनेन ज्ञायते यत् भोजराजेन त्वेतदुद्घोषितमासीत्- **"संस्कृतं यो न जानति, मद्राज्यात् बहिरस्तु सः।"**

प्राचीनकाले सर्वे जनाः संस्कृतभाषायां व्याहरन् इति सामान्यजनानामपि व्याकरणज्ञानमासीत् इत्यत्र अयमपि एकः दृष्टान्तः -

एकदा भोजराजः पल्लंकिकां गच्छन् भारवाहकान्- **"अयमान्दोलिकादण्डः स्कन्धे किं तव बाधति?"**

श्रुत्वेदं वाक्यं भारवाहकः अवदत्- **"न बाधते तथा मह्यं हि, यथा बाधति बाधते।"** अर्थात् तव बाधति इति अशुद्धप्रयोगः यथा मां कष्टयति, तथा अयं भारः न पीड़यति।

अनेन ज्ञायते यत् पुराकाले सामान्यजनाः अपि अनया एव भाषया स्वमनोभावं प्रकटयन्ति स्म।

एभिः प्रमाणैः संस्कृतभाषितभाषात्वेनासीदिति अवश्यं वक्तुं शक्यते।

**संस्कृतस्य वर्तमानस्थितिः-** एतादृषस्य वैशिष्ट्ययुक्तस्य संस्कृतस्य स्थितिः साम्प्रतिके भारते नात्यन्तमुत्तमा दृश्यते। मध्यकालादारभ्य अस्याः स्थितिः उपचयापचयं प्राप्य डोलायमानैव वरीवर्ति। यवनैः आक्रमणपूर्वकं भारतीयशास्त्रागाराः नाशिताः, तत्कालीनशिक्षाव्यवस्थायाः आधारभूतानि गुरुकुलान्यपि नष्टानि। तेन संस्कृतस्य भारतीयसंस्कृतेश्च महती क्षतिः अभवत्। तथैव आंग्लकालेऽपि शिक्षाव्यवस्थायां आमूलचूलपरिवर्तनेन संस्कृतस्य ह्रासः जातः। स्वातंत्र्यात् परं संस्कृतस्य स्थितेः सर्वेक्षणं विधाय तस्याः अभिवृद्धये बहून् उपायान् प्रास्तौत् संस्कृताऽऽयोगः। किन्तु सर्वकारस्य दृष्ट्याभावात् व्यवसायावसराभावाच्च जनाः संकृतेन विरक्ताः। साम्प्रतं जनाः इमां व्यवहर्तुं न शक्नुवन्ति अभ्यासाभावात् व्यवहारे प्रचलनाभावाच्च। किञ्च भाषेयं सम्यग् उच्चारणीया अशुद्धोच्चारणेन पापं भवति इति मन्यमाना जनाः इमां न प्रयुज्यन्ते। अत एवस्याः स्थितिः दयनीया जाता, उक्तमपि कविना-

**यस्मिन्नेव लसत्यतीव मधुरा पीयूषधाराऽमरा।**
**यामालोड्य जानास्तरन्ति जगतां सन्तापकल्लोलिनीं।।**

**सा चेद्दिव्य सुधामयी हि वसुधां सन्तर्पिणी वाग्झरी।**

**हंहो शोषमुपगता हि भगवती किं जीवितेनास्ति नः।।**

अतः अस्माकं जीवनं किमर्थम् ? व्यर्थमेव, यतोहि संस्कृतं पठित्वा अपि वयं सामाजिकजीवने इमां व्यवहर्तुमक्षमाः...।

**संस्कृतं पुनः जनभाषा किमर्थम्?** अस्माकं भारतीयसंस्कृतेः सभ्यतायाश्च आधारभूतायाः संस्कृतभाषायाः प्रवर्धनेनैव संस्कृतेः सम्यक् परिवर्धनं भवितुमर्हति। अस्माभिः सदैव भारतीयसंस्कृतेः संरक्षणाय परिवर्धनाय च भाषेयं बाल्यादेव तेषां व्यवहारे उपयोक्तुं शक्या। किञ्च मृत्भाषा, पण्डितानां भाषा इति मन्यमानाः वयं इमां मनःस्थितौ परिवर्तनं समायातुं शक्नुमः। अतः अस्माभिः सदैव व्यवहारे उपयोक्तव्या चेयं भाषा। अन्यथा 'गुरुगौरवसम्मानितोऽयं' देशः परसंस्कृतापेक्षी भविष्यति।

**यावद् भारतवर्षं स्यात् यावद् विन्ध्यहिमाचलौ।**

**यावद्गंगा च गोदा च तावदेव हि संसकृतम्।।**

**संस्कृतं जनभाषाकर्तुम् उपहुतिः-**

1. जनजागरणाभावः।
2. रुचेः अभावः।
3. व्यवसायावसराणामभावः।
4. भाषामाध्यमेन शिक्षणाभावः।
5. प्रचाराभावः।
6. पाठ्यक्रमेषु उचितस्थानाभावः।
7. समाजोपयोगी-सरलसाहित्याभावः।
8. अनुसन्धनाभावः।
9. मनोरञ्जनसाधनाभावः।
10. संस्कृतशिक्षकाणां दायित्त्वबोधाभावः।
11. भाषाकौशलानाम् अनुसरणाभावः।
12. सरलसंस्कृतस्य प्रसाराभावः।

**संस्कृतं पुनः जनभाषाकर्तुं मार्गः -**

1. रुच्युत्पादनम्।
2. जनान्दोलनम्।
3. व्यवसायावसरकल्पनम्।
4. भाषामाध्यमेन शिक्षणम्।
5. प्रचाराभियानम्।
6. पाठ्यक्रमेषु उचितस्थानकल्पनम्।
7. समाजोपयोगी-सरलसाहित्यसर्जनम्।
8. संस्कृतक्षेत्रे क्रियात्मकमनुसन्धनम्।
9. मनोरञ्जनसाधनानां निर्मणम्।

10. संस्कृतशिक्षकेषु दायित्त्वबोधजागरणम्।
11. भाषाकौशलानाम् अनुसरणम्।
12. सरलसंस्कृतस्य प्रसाराभियानम्।
13. सांस्कृतिकपृष्ठभूमौ संस्कृतस्य पाठनम्।
14. संस्कृतनिष्ठानां वैज्ञानिकविषयाणां प्रचारप्रसारः।
15. संस्कृतबालगीतानां आधुनिकरीत्या पाठ्यक्रमे पाठनार्थं स्थानकल्पनम्।
16. संस्कृताध्ययनं आकर्षकं रोचकञ्च कर्तुं यथायोग्यं दृश्यश्राव्योपकरणानामुपयोगः।
17. जनसञ्चारमाध्यमेन संस्कृतकार्यक्रमाणां व्यापकरूपेण प्रसारणम्।
18. पुरस्कार–छात्रवृत्तीनां व्यवस्था।
19. संस्कृतज्ञानस्य समुचितं स्थानांतरणम्।
20. ज्ञानविज्ञानयोः विषयाणां सरलरीत्या संस्कृतभाषायां प्रकाशनम्।
21. प्राचीनपाण्डुलिपीनां सम्पादनं प्रकाशनञ्च।
22. भाषिकतत्वानां वैज्ञानिकरीत्या प्रतिपादनपुरस्सरं प्रकाशनम् ।
23. विद्यालयेषु समाजे च संस्कृतक्रीड़ानामायोजनम्।
24. पत्राचारद्वारा संस्कृतशिक्षणम्।
25. समाजाय संस्कृतपत्रपत्रिकाणां प्रकाशनम्।
26. सामाजिकोत्सवेषु संस्कृतकार्यक्रमाणामायोजनम्।
27. संस्कृतकार्येषु सामाजिकानां सहभागिता।

एते मार्गाः अस्माभिः संस्कृतज्ञैः प्रतिपदमनुसरणीयाः। एतन्याह्वानानि यद्यस्माभिः प्रतिपलं परिपाल्यन्ते चेद् संस्कृतं अचिरं पुनः जनभाषा भविष्यतीति नास्ति सन्देहावसरः। तेन भारतस्य पुनः विश्वगुरुत्वप्रतिष्ठापनमार्गः प्रशस्तः भविष्यति।

**अद्धेयग्रन्थाः-**


1. आचार्यदण्डीः– काव्यादर्शः।
2. डॉ.कपिलदेवद्विवेदी, भाषा विज्ञान एवं भाषा शास्त्र, विश्वविद्यालय प्रकाशन, वाराणसी– 2012
3. विष्णुपुराणम्, गीताप्रेस, गौरखपुरम्।
4. भर्तृहरिः,'वाक्यपदीयं, ब्रह्मकाण्डम्।
5. महाभारतम्, गीताप्रेस, गौरखपुरम्।